# आदर्श-प्रश्न-पत्रम्-2019-20

## कक्षा : दशमी

## संस्कृतम् (122)

## मॉडल पेपर-4

**समयः- होरात्रयम्** **सम्पूर्णांकाः-80**

**सामान्यनिर्देशाः-**

1. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 11 पृष्ठानि मुद्रितानि सन्ति।
2. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 18 प्रश्नाः सन्ति।
3. उत्तरलेखनात् पूर्वं प्रश्नस्य क्रमांकः अवश्यं लेखनीयः।
4. अस्य प्रश्नपत्रस्य पठनाय 15 निमेषाः निर्धारिताः सन्ति। अस्मिन् अवधौ केवलं प्रश्नपत्रं पठनीयम् उत्तरपुस्तिकायां च किमपि न लेखनीयम्।

**प्रश्नपत्रस्वरूपम्-**

**खण्ड : क : अपठित-अवबोधनम्** 10 अंकाः

**खण्ड : ख : रचनात्मककार्यम्** 15 अंकाः

**खण्ड : ग : अनुप्रयुक्तव्याकरणम्** 25 अंकाः

**खण्ड : घ : पठित-अवबोधनम्** 30 अंकाः

(i) अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति।

(ii) प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।

(iii) प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।

(iv) सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।

(v) प्रश्नानाम् निर्देशाः ध्यानेन अवश्यं पठनीयाः।

---

## खण्डः - क 10 अंकाः

## अपठित-अवबोधनम्

**1. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत-** **10**

एकस्य शुनः ताम्रचूडेन कुक्कुटेन साकं घनिष्ठा मैत्री आसीत्। तौ एकान्ते समुपविश्य वार्तां कुरुतः स्म। एकस्मिन् दिने पुरात् निष्क्रम्य परस्परं चर्चां कुर्वन्तौ तौ घनं वनं प्रविष्टौ। शनैः शनैः सर्वत्र नैशं तमः प्रासरत्। तौ प्रयत्नादपि नगरयायिनं मार्गं नालभेताम्। रजन्यां वनेऽवस्थानं निश्चित्य कुक्कुटः तरुशाखामुपाश्रयत् कुक्कुरश्च तरोरधः। रात्रिर्विगता। प्रभातः सञ्जातः। सूर्योदयः जातः। तद्रश्मयः प्रासरन्। अत्यजन् स्वभावपराधीनः कुक्कुटः तारस्वरेण कुकडूँकूँ- ध्वनिमकरोत्। तं ध्वनिमाकर्ण्य काचित् लोमशा भोजनाऽऽशया तत्र समागच्छत्। सा तरुमारूढं कुक्कुटमुवाच-मित्र! कथं दूरमवस्थितोऽसि? नीचैरागच्छ। मिलित्वा प्रभातगीतम् गायावः। परिणामतः लोमशस्य तृप्तिः जाता। बुद्धिबलं प्रधानम्।

1. एकपदेन उत्तरत- (केवलं प्रश्नद्वयम्) $1 \times 2 = 2$
   (i) कः तरुशाखामुपाश्रयत्?
   (ii) तौ कुत्र उपविश्य वार्तां कुरुतः स्म?
   (iii) का विगता?
2. पूर्णवाक्येन लिखत- (केवलं प्रश्नद्वयम्) $2 \times 2 = 4$
   (i) लोमशा कुक्कुटम् किमुवाच?
   (ii) कुक्कुटः कीदृशीं ध्वनिमकरोत्?
   (iii) शुनः ताम्रचूड़ेन साकं कीदृशी मैत्री आसीत्?
3. अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत। 1
4. यथानिर्देशम् उत्तरत- (केवलं प्रश्नत्रयम्) $1 \times 3 = 3$
   (i) 'खगः' इति पदस्य पर्यायपदं गद्यांशे किम् प्रयुक्तम्?
      (क) शुनः
      (ख) कुक्कुटः
      (ग) विहगः
   (ii) 'अकरोत्' इति क्रियापदस्य कर्तृपदं किम्?
      (क) शुनः
      (ख) कुक्कुटः
      (ग) रविः

(iii) 'प्रकाशः' इति पदस्य विलोमपदं गद्यांशे किं प्रयुक्तम्?

(क) घनः

(ख) तमः

(ग) नीडः

(iv) 'वनं' इति पदस्य विशेषणपदं गद्यांशे किं प्रयुक्तम्?

(क) घनं

(ख) नैशं

(ग) नीडं

**उत्तरम् :**

1. (i) कुक्कुटः
   (ii) एकान्ते
   (iii) रात्रिः
2. (i) लोमशा कुक्कुटम् उवाच– "मित्र! कथं दूरमवस्थितोऽसि? नीचैरागच्छ। मिलित्वा प्रभातगीतम् गायावः।"
   (ii) कुक्कुटः तारस्वरेण कुकडूकूँ–ध्वनिमकरोत्।
   (iii) शुनः ताम्रचूडेन कुक्कुटेन साकं घनिष्ठा मैत्री आसीत्।
3. **शीर्षक–** बुद्धिबलं प्रधानम्, बुद्धि सर्वोपरि।
4. (i) (ग) विहगः
   (ii) (ख) कुक्कुटः
   (iii) (ख) तमः
   (iv) (क) घनं

## खण्डः – ख 15 अंकाः

## रचनात्मककार्यम्

**2. भवान् सौरभः। भवतः भगिनी रमा सर्वश्रेष्ठ प्रचारिकापुरस्कारं प्राप्तवती। तस्याः कृते लिखितं वर्धापन पत्रं मञ्जूषापदानां सहायतया पूरयित्वा पुनः लिखत–** $1/2 \times 10 = 5$

एन 37, कृष्णानगरम्
(1) ..........
दिनांकः ..........।
प्रिय रमे,
(2) .......... नमः।
अत्र सर्वगतं कुशलं तत्रापि (3) ..........। मया दूरदर्शनात् वार्तां श्रुत्वा ज्ञातं यत् भवती संस्कृत क्षेत्रे 'सर्वश्रेष्ठप्रचारिका' इति पुरस्कारं (4) ..........। मम तु शिरं स्वाभिमानेन (5) .......... अभवत्। अहं जानामि यत् भवती बाल्यादेव प्रचारकार्ये (6) ..........। इदानीं ग्रामे ग्रामे संस्कृतसाहित्यस्य प्रचारं (7) .......... भवती धन्या। भारतीयसंस्कृतेः रक्षणाय बहुपरिश्रमं (8) .......... उद्यता। मम पक्षतः बहूनि (9) .......... स्वीकारेतु।
गृहे सर्वेभ्यः मम प्रणामाञ्जलिः निवेदनीय।
भवत्याः सद्भावी (10) ..........
सौरभः

| मञ्जूषा |
|---|
| कुर्वन्ती, करोति, अस्तु, वाराणसीतः, लब्धवती, सस्नेहम्, अग्रजः, वर्धापनानि, संलग्ना, समुन्नतम् |

**उत्तरम् :**

एन 37, कृष्णानगरम्
(1) **वाराणसीतः**
दिनांकः ..........।
प्रिय रमे,
(2) **सस्नेहम्** नमः।
अत्र सर्वगतं कुशलं तत्रापि (3) **अस्तु**। मया दूरदर्शनात् वार्तां श्रुत्वा ज्ञातं यत् भवती संस्कृत क्षेत्रे 'सर्वश्रेष्ठप्रचारिका' इति पुरस्कारं (4) **लब्धवती**। मम तु शिरं स्वाभिमानेन (5) **समुन्नतम्** अभवत्। अहं जानामि यत् भवती बाल्यादेव प्रचारकार्ये (6) **संलग्ना**। इदानीं ग्रामे ग्रामे संस्कृतसाहित्यस्य प्रचारं (7) **कुर्वन्ती** भवती धन्या। भारतीयसंस्कृतेः रक्षणाय बहुपरिश्रमं (8) **करोति** उद्यता। मम पक्षतः बहूनि (9) **वर्धापनानि** स्वीकारेतु।
गृहे सर्वेभ्यः मम प्रणामाञ्जलिः निवेदनीय।
भवत्याः सद्भावी (10) **अग्रजः**
सौरभः

**3. अधः प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्च वाक्यानि संस्कृतेन लिखत–** $1 \times 5 = 5$



**मञ्जूषा–**उद्यानम्, मनोहरम्, पादपाः, अनेके पुष्पाणि, बहुविधानि, भ्रमणम्, भ्रमन्ति, क्रीडन्ति, व्यायामम्, एका बालिका, स्त्री, पुरुषः

**उत्तरम् :**

1. एतत् एकम् मनोहरम् उद्यानम् अस्ति।
2. अत्र स्त्री पुरुषः च भ्रमणं करोति।
3. एका बालिका रज्ज्वा कूर्दति।
4. बालकाः व्यायामं कुर्वन्ति।
5. अत्र बहुविधानि अनेकानि पुष्पाणि, पादपाः च शोभन्ते।

**अथवा**

**मञ्जूषाप्रदत्तशब्दानां साहाय्येन निम्नलिखितं विषयम् अधिकृत्य पञ्चभिः संस्कृतवाक्यैः एकम् अनुच्छेदं लिखत–** $1 \times 5 = 5$

**''विद्यालये दशमकक्षायाः दीक्षान्तसमारोहः''**

| |
|---|
| **मञ्जूषा–**अल्पाहारस्य, व्यवस्था, मस्तके, आशीर्वादः, सांस्कृतिक कार्यक्रमः, प्रधानाचार्येण, तिलकं, प्रांगणे, संस्कृताध्यापकेन, कृतम्, आयोजितः, छात्रेभ्यः। |

**उत्तरम् :**

**विद्यालये दशमकक्षायाः दीक्षान्तसमारोहः**

विद्यालयस्य प्राङ्गणे दशमकक्षायाः सांस्कृतिक–कार्यक्रमः आयोजितः। प्रधानाचार्येण छात्रेभ्यः आशीर्वादः प्रदत्तः। छात्रेभ्यः अल्पाहारस्य अपि व्यवस्था आसीत्। संस्कृताध्यापकेन छात्राणां मस्तके तिलकं कृतम्। संस्कृताध्यापकेन छात्रेभ्यः कलमं प्रदत्तः। एषः कार्यक्रमः अति शोभनः आसीत्।

**4. अधोलिखितानि वाक्यानि संस्कृतभाषया अनूद्य लिखत– (केवलं वाक्यपञ्चकम्)** $1 \times 5 = 5$

1. सेना प्रमुख सरणी की व्यवस्था करते हैं।
   Army chief arranges the array.
2. समाचार रिपोर्टर का मुख्य काम समाचार एकत्र करना है।
   The main job of the news reporter is to collect the news.
3. शरीर की वृद्धि के लिए उचित आहार आवश्यक है।
   Proper diet is essential for growth of the body.
4. समुद्र का पानी खारा है।
   Sea water is salty.
5. न्यायाधीश द्वारा दोषी को दंडित किया जाना चाहिए।
   Justice should punish the guilty.
6. मैने घने जंगल में एक बाघ को देखा।
   I saw a tiger in the dense forest.
7. उसका अभिनय कृत्रिम प्रतीत होता है।
   Her acting appears artificial.

**उत्तरम् :**

1. सेनाप्रमुखः व्यूहं रचयति।
2. वृत्तसङ्कलनम् इति वार्ताहरस्य प्रमुखं कार्यम्।
3. शरीरवर्धनाय/शरीरवृद्ध्यर्थं योग्यः आहारः आवश्यकः।
4. सागरजलं लवणं/क्षारं वर्तते।
5. न्यायाधीशः अपराधिनं दण्डयेत्।
6. अहं निबिडे वने एकं व्याघ्रम् अपश्यम्।/मया निबिडे अरण्ये एकः व्याघ्रः दृष्टः।
7. तस्याः अभिनयः कृत्रिमः प्रतिभाति।

**खण्डः ग** **25 अंकाः**

## अनुप्रयुक्तव्याकरणम्

**5. अधोलिखितवाक्येषु रेखांकितपदेषु सन्धिं सन्धिच्छेदं वा कुरुत– (केवलं प्रश्नचतुष्टयम्)** $1 \times 4 = 4$

1. कामात् क्रोधः + अभिजायते।
   **उत्तरम् :** क्रोधोऽभिजायते
2. हे ईश्वरः! नमस्कारम्।
   **उत्तरम् :** नमः + कारम्
3. बालकः निः + ठुरः अस्ति।
   **उत्तरम् :** निष्ठुरः
4. कोषः सञ्चयात् क्षयम् याति।
   **उत्तरम् :** सम् + चयात्
5. प्रणवः ग्रामम् + गतः।
   **उत्तरम् :** ग्रामं गतः

**6. अधोलिखितवाक्येषु रेखांकितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत– (केवलं प्रश्नचतुष्टयम्)** $1 \times 4 = 4$

1. छात्राः यन्त्रदर्शनेन हृष्यन्ति।
   (क) यन्त्रेण दर्शनेन
   (ख) यन्त्रम् दर्शनेन
   (ग) यन्त्रस्य दर्शनेन
   **उत्तरम् :** (ग) यन्त्रस्य दर्शनेन
2. सः प्रतिदिनं पूजां करोति।
   (क) दिनं–दिनं प्रति इति
   (ख) प्रतिदिने
   (ग) अदिने
   **उत्तरम् :** (क) दिनं–दिनं प्रति इति
3. सर्वेषामेव महत्त्वं विद्यते यथासमयम्।
   (क) समये क्रम्य
   (ख) समयम् अनतिक्रम्य
   (ग) समयाय अनतिक्रम्य
   **उत्तरम् :** (ख) समयम् अनतिक्रम्य
4. द्रोणपुत्रः अश्वत्थामा आसीत्।
   (क) द्रोणस्य पुत्रः
   (ख) द्रोणाय पुत्रः
   (ग) द्रोणात् पुत्रः
   **उत्तरम् :** (क) द्रोणस्य पुत्रः
5. निर्जलम् सरोवरं पश्य।
   (क) जले अभावः
   (ख) जलस्य अभावः
   (ग) जलम् अभावः
   **उत्तरम् :** (ख) जलस्य अभावः

**7. अधोलिखितवाक्येषु रेखांकितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्यः चित्वा लिखत- (केवलं प्रश्नचतुष्ट्यम्)** $1 \times 4 = 4$

1. अहो विज्ञानमय + ङीप् एषा कल्पना।
   (क) विज्ञानमयी
   (ख) विज्ञानमायी
   (ग) विज्ञानमयायी

   **उत्तरम् :** (क) विज्ञानमयी
2. सीता चतुर+टाप् बालिका अस्ति।
   (क) चतुरा
   (ख) चतुर
   (ग) चतुरतरा

   **उत्तरम् :** (क) चतुरा
3. बलवती हि आशा।
   (क) बली+मतुप्
   (ख) बल+मतुप्
   (ग) बल+णिनि

   **उत्तरम् :** (ख) बल+मतुप्
4. मनसः चञ्चल+तल् कः निरोद्धुं क्षमः?
   (क) चञ्चलन्तम्
   (ख) चञ्चलताम्
   (ग) चञ्चलतायाः।

   **उत्तरम् :** (ख) चञ्चलताम्
5. किं त्वं न जानासि कालस्य महत्त्वम्।
   (क) महा + त्वं
   (ख) मह + त्वं
   (ग) महत् + त्व

   **उत्तरम् :** (ग) महत् + त्व

**8. मञ्जूषायां प्रदत्तैः पदैः वाच्यपरिवर्तनं कृत्वा अधोलिखितं संवादं पुनः लिखत-** $1 \times 3 = 3$

**पुत्रः-** अहं ओदनम् खादितुम् (1) ..........। (इष्)
**माता-** किं त्वया केवलम् ओदनम् एव खादिष्यते।
**पुत्रः-** आम्, मातः मया (2) .......... एव खाद्यते।
**माता-** दधि न स्वीकरिष्यते?
**पुत्रः-** अस्वस्थः अस्मि अतः (3) .......... न स्वीकरिष्यते।
**माता-** दधि तु गुणकारि भवति। किं त्वम् न जानासि?
**पुत्रः** मया एतत् ज्ञायते। (अस्मद्)

| मञ्जूषा |
|---|
| दधि, इच्छामि, ओदनम्। |

**उत्तरम् :**
(1) इच्छामि, (2) ओदनम्, (3) दधि।

**अथवा**

**अधोलिखितानां वाक्यानां वाच्यपरिवर्तनं कुरुत (केवलं त्रयाणाम्)-**

1. बालकः हसति।
2. रामेण ग्रामः गम्यते।
3. अहं वृक्षं पश्यामि।
4. तेन पाठः पठयते।
5. कार्यार्थिना दाक्षिण्यं न क्रियते।

**उत्तरम् :**
1. बालकेन हस्यते।
2. रामः ग्रामं गच्छति।
3. मया वृक्षः दृश्यते।
4. सः पाठं पठति।
5. कार्यार्थी दाक्षिण्यं न करोति।

**9. कालबोधकशब्दैः अधोलिखित- दिनचर्यां वा पूरयत- (केवलं प्रश्नचतुष्ट्यम्)** $1 \times 4 = 4$

1. प्रातः 5:00 .......... वादने उत्तिष्ठति।
2. अपराह्णे 12:30 .......... वादने सः भोजनं करोति।
3. सायं 4:15 .......... वादने भ्रमणाय गच्छति।
4. सायं 5:30 ......... वादने मित्रैः सह क्रीड़ति।
5. रात्रौ 8:45 .......... वादने शयनं करोति।

**उत्तरम् :**
1. पञ्च
2. सार्द्धद्वादश
3. सपादचर्तु
4. सार्ध पञ्च
5. पादोन-नव

**10. मञ्जूषायां प्रदत्तैः उचितैः अव्ययपदैः अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत- (केवलं प्रश्नषटकम्)** $1/2 \times 6 = 3$

1. विद्यालयस्य छात्राः कथम् ......... धावन्ति?
2. दुष्टाः ......... एव जल्पन्ति।
3. ..... ..... विदधीत न क्रियाम्।
4. वृद्धा ......... स्वकार्याणि करोति।
5. मेघाः .......... गर्जन्ति।
6. अहम् .......... दूरदर्शने नाटकम् पश्यामि।
7. ......... त्वम् स्वकार्यं कुरु।
8. मम मातामही ......... वृद्धा अस्ति।

| **मञ्जूषा** |
|---|
| वृथा, शनैः, इतस्ततः, सहसा, इदानीम्, अपि, अधुना, उच्चैः |

**उत्तरम् :**
1. इतस्ततः
2. वृथा

3. सहसा
4. शनैः
5. उच्चैः
6. अधुना
7. इदानीम्
8. अपि

**11. अधोलिखितवाक्येषु रेखांकितपदम् अशुद्धम् अस्ति। शुद्धं पदं विकल्पेभ्यः चित्वा लिखत- (केवलं प्रश्नत्रयम्)** $1 \times 3 = 3$

1. वयम् ह्यः जन्तुशालाम् द्रक्ष्यामः। (अपश्याव/अपश्यत्/ अपश्याम)
2. उद्यानं परितः वृक्षाः आसीत्। (अस्ति/ आस्ताम्/आसन्)
3. अहमेव तव मित्रम् अस्ति। (एधि/अस्मि/सन्ति)
4. भवान् कुत्र गच्छसि? (गच्छति/ गच्छथः/गच्छन्ति)

**उत्तरम् :**

1. अपश्याम
2. आसन्
3. अस्मि
4. गच्छति

## खण्डः – घ 30 अंकाः

## पठित-अवबोधनम्

**12. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत-** **5**

इति श्रुत्वा व्याघ्रमारी काचिदियमिति मत्वा व्याघ्रो भयाकुलचित्तो नष्टः।

निजबुद्ध्या विमुक्ता सा भयाद् व्याघ्रस्य भामिनी।
अन्योऽपि बुद्धिमाँल्लोके मुच्यते महतो भयात्।।

भयाकुलं व्याघ्रं दृष्ट्वा कश्चित् धूर्तः श्रृगालः हसन्नाह- "भवान् कुतः भयात् पलायितः?"

व्याघ्रः- गच्छ, गच्छ जम्बुक! त्वमपि किञ्चिद् गूढप्रदेशम्। यतो व्याघ्रमारीति या शास्त्रे श्रूयते तयाहं हन्तुमारब्धः परं गृहीतकरजीवितो नष्टः शीघ्रं तदग्रतः।

श्रृगालः- व्याघ्र! त्वया महत्कौतुकम् आवेदितं यन्मानुषादपि बिभेषि?

व्याघ्रः- प्रत्यक्षमेव मया सात्मपुत्रावेकैकशो मामत्तुं कलहायमानौ चपेटया प्रहरन्ती दृष्टा।

1. एकपदेन उत्तरत- (केवलं प्रश्नद्वयम्) $1/2 \times 2 = 1$
   (i) कः भयाकुलचित्तो नष्टः?
   (ii) सा भामिनी कथं व्याघ्रस्य भयाद् विमुक्ता?
   (iii) भयाकुलं व्याघ्रं दृष्ट्वा कः हसन्नाह?
2. पूर्णवाक्येन उत्तरत- (केवलं प्रश्नमेकम्) $1 \times 1 = 1$
   (i) किं मत्वा व्याघ्रो भयाकुलचित्तो नष्टः?
   (ii) व्याघ्रः जम्बुकं कुत्र गन्तुं कथयति?
3. प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत- (केवलं प्रश्नत्रयम्) $1 \times 3 = 3$
   (i) 'त्वया' इत्यस्य गद्यांशे क्रियापदं किम्?
   (क) कौतुकम्
   (ख) आवेदितम्
   (ग) आह
   (ii) 'गच्छ' गति क्रियापदस्य कर्तृपदं किम्?
   (क) अहम्
   (ख) त्वम्
   (ग) मया
   (iii) 'व्याघ्रम्' इति पदस्य किं विशेषणपदं गद्यांशे प्रयुक्तम्?
   (क) भवान्
   (ख) नष्टः
   (ग) भयाकुलम्
   (iv) 'श्रृगालः' इति पदस्य पर्यायपदं गद्यांशात् चित्वा लिखत।
   (क) जम्बुकः
   (ख) भवान्
   (ग) माम्

**उत्तरम् :**

1. (i) व्याघ्रः।
   (ii) निजबुद्ध्या।
   (iii) श्रृगालः।
2. (i) व्याघ्रमारी काचिदियमिति मत्वा व्याघ्रो भयाकुलचित्तो नष्टः।
   (ii) व्याघ्रः जम्बुकं किञ्चिद् गूढप्रदेशं गन्तुं कथयति।
3. (i) (ख) आवेदितम्
   (ii) (ख) त्वम्
   (iii) (ग) भयाकुलम्
   (iv) (क) जम्बुकः।

**13. अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत-** **5**

शरीरोपचयः कान्तिर्गात्राणां सुविभक्तता।
दीप्ताग्नित्वमनालस्यं स्थिरत्वं लाघवं मृजा।।

1. एकपदेन उत्तरत- (केवलं प्रश्नद्वयम्) $1/2 \times 2 = 1$
   (i) शरीरोपचयः केन भवति?
   (ii) व्यायामेन केषां सुविभक्तता भवति?
   (iii) दीप्ताग्नित्वं केन भवति?
2. पूर्णवाक्येन उत्तरत- (केवलं प्रश्नमेकम्) $1 \times 1 = 1$
   (i) अनालस्यं केन आयाति?
   (ii) लाघवं मृजा च कथमायाति?
3. निर्देशानुसारम् उत्तरत- (केवलं प्रश्नत्रयम्) $1 \times 3 = 3$
   (i) 'आलस्यम्' इति पदस्य विलोमपदं श्लोकात् चित्वा लिखत।

(क) दीप्त

(ख) उपचयः

(ग) अनालस्यम्

(ii) 'अङ्गानाम्' इत्यस्य कः पर्यायः श्लोके प्रयुक्तम्?

(क) गात्राणाम्

(ख) सुविभक्तता

(ग) शरीरम्

(iii) 'स्वच्छीकरणम्' इत्यर्थे श्लोके किं पदं प्रयुक्तम्?

(क) मृजा

(ख) लाधवम्

(ग) कान्तिः

(iv) 'दीप्ताग्नित्वम्' अनयोः पदयोः किं विशेष्यपदम्?

(क) दीप्त

(ख) अग्नित्वम्

(ग) उभे

**उत्तरम् :**

1. (i) व्यायामेन।
   (ii) गात्राणाम्।
   (iii) व्यायामेन।
2. (i) अनालस्यं व्यायामेन आयाति।
   (ii) लाघवं मृजा च शरीरे व्यायामेन आयाति।
3. (i) (ग) अनालस्यम्।
   (ii) (क) गात्राणाम्।
   (iii) (क) मृजा।
   (iv) (ख) अग्नित्वम्।

**14. अधोलिखितं नाटयांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत– 5**

**चाणक्यः**– भो श्रेष्ठिन्! चन्द्रगुप्तराज्यमिदं न नन्दराज्यम्। नन्दस्यैव अर्थसम्बन्धः प्रीतिमुत्पादयति। चन्द्रगुप्तस्य तु भवताम–परिक्लेश एव।

**चन्दनदास :**– (सहर्षम्) आर्य! अनुगृहीतोऽस्मि।

**चाणक्यः**– भो श्रेष्ठिन्! स चापरिक्लेशः कथमाविर्भवति इति ननु भवता प्रष्टव्याः स्मः।

**चन्दनदासः**– आज्ञापयतु आर्यः।

**चाणक्यः**– राजनि अविरूद्धवृत्तिर्भव।

**चन्दनदासः**– आर्य! कः पुनरधन्यो राज्ञो विरूद्ध इति आर्येणावगम्यते?

**चाणक्यः**– भवानेव तावत् प्रथमम्।

**चन्दनदासः**– (कर्णौ पिधाय) शान्तं पापम्, शान्तं पापम्। कीदृशस्तृणानामग्निना सह विरोधः?

**चाणक्यः**– अयमीदृशो विरोधः यत् त्वमद्यापि राजापथ्यकारिणोऽमात्य–राक्षसस्य गृहजनं स्वगृहे रक्षसि।

**चन्दनदासः**– आर्य!अलीकमेतत्। केनाप्यनार्येण आर्याय निवेदितम्।

1. एकपदेन उत्तरत– (केवलं प्रश्नद्वयम्) $1/2 \times 2 = 1$
   (i) चाणक्यानुसारं चन्दनदासः राजानं प्रति कीदृशः भवितव्यः?
   (ii) केन चन्दनदासो राज्ञो विरूद्ध इति अवगम्यते?
   (iii) नन्दस्य कः प्रीतिमुत्पादयति?
2. पूर्णवाक्येन उत्तरत– (केवलं प्रश्नमेकम्) $1 \times 1 = 1$
   (i) चन्दनदासेन चाणक्यः किं प्रष्टव्यः?
   (ii) चन्दनदासः कस्य गृहजनं स्वगृहे रक्षति?
3. प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत– (केवलं प्रश्नत्रयम्) $1 \times 3 = 3$
   (i) 'त्वम्' इति कर्तृपदस्य नाट्यांशे किं क्रियापदं प्रयुक्तम्?
   (क) रक्षसि
   (ख) अस्मि
   (ग) निवेदितम्
   (ii) 'उत्पादयति' इति क्रियापदस्य कर्तृपदं किम्?
   (क) अर्थसम्बन्धः
   (ख) नन्दः
   (ग) चाणक्यः
   (iii) 'शान्तं पापम्' इत्यत्र विशेष्य पदं किम्?
   (क) शान्तम्
   (ख) पापम्
   (ग) उभे
   (iv) 'आर्येण' इत्यस्य विलोमपदं नाट्यांशे किं प्रयुक्तम्?
   (क) रक्षसि
   (ख) केन
   (ग) अनार्येण

**उत्तरम् :**

1. (i) अविरूद्धवृत्तिः।
   (ii) चाणक्येन।
   (iii) अर्थसम्बन्धः।
2. (i) राजानं प्रति अपरिक्लेशः कथमाविर्भवतीति चन्दनदासेन चाणक्यः प्रष्टव्यः।
   (ii) चन्दनदासः राजापथ्यकारिणोऽमात्य–राक्षसस्य गृहजनं स्वगृहे रक्षति।
3. (i) (क) रक्षसि।
   (ii) (क) अर्थसम्बन्धः।
   (iii) (ख) पापम्।
   (iv) (ग) अनार्येण।

**15. रेखांकित–पदानि आधृत्य प्रश्ननिर्माणं कुरुत– (केवलं प्रश्नचतुष्ट्यम्)** $1 \times 4 = 4$

1. सिंहासनस्थः रामः प्रविशति।
2. विदूषकेन उपदिश्यमानमार्गौ लवकुशौ प्रविशतः।
3. कुशलवौ रामस्य समीपमुपसृत्य प्रणमतः।

4. अनयोः स्पर्शः हृदयग्राही वर्तते।
5. एतत् राजासनं न युक्तमध्यासितुम्।

**उत्तरम् :**

1. सिंहासनस्थः कः प्रविशति?
2. केन उपदिश्यमानमार्गौ लवकुशौ प्रविशतः?
3. कौ रामस्य समीपमुपसृत्य प्रणमतः?
4. अनयोः स्पर्शः कीदृशः वर्तते?
5. एतत् किम् न युक्तमध्यासितुम्?

**16. मञ्जूषातः समुचितपदानि चित्वा अधोलिखित-श्लोकयोः अन्वयं पूरयत-** $1/2 \times 4 = 2$

I. न चास्ति सदृशं तेन किञ्चित्स्थौल्यापकर्षणम्।
न च व्यायामिनं मर्त्यमर्दयन्त्यरयो बलात्।।

**अन्वयः-** तेन सदृशं (1) .......... च किञ्चित् न अस्ति। न च (2) .......... मर्त्यम् (3) ..........बलात् (4) ..........।

II. भवन्तौ गायन्तौ कविरपि पुराणो व्रतनिधिर्
गिरां सन्दर्भोऽयं प्रथममवतीर्णो वसुमतीम्। $1/2 \times 4 = 2$
कथा चेयं श्लाघ्या सरसिरूहनाभस्य नियतं,
पुनाति श्रोतारं रमयति च सोऽयं परिकरः।।

**अन्वयः-** भवन्तौ गायन्तौ, पुराणः (1) .......... कविः अपि, वसुमतीम् प्रथमं (2) .......... गिराम् अयं सन्दर्भः, (3) .......... च इयं श्लाघ्या कथा, सः च अयं (4) .......... नियतं श्रोतारं पुनाति रमयति च।

| मञ्जूषा |
|---|
| व्यायामिनं, अरयः, स्थौल्यापकर्षणम्, अर्दयन्ति, अवतीर्णः, परिकरः, व्रतनिधिः, सरसिरूहनाभस्य। |

**उत्तरम् :**

I **अन्वयः** (1) स्थौल्यापकर्षणम्, (2) व्यायामिनं, (3) अरयः, (4) अर्दयन्ति।

II **अन्वयः** (1) व्रतनिधिः, (2) अवतीर्णः, (3) सरसिरूहनाभस्य, (4) परिकरः।

**अथवा**

**मञ्जूषायाः साहाय्येन श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुनः लिखत-** $1 \times 4 = 4$

दुष्कराण्यपि कर्माणि मतिवैभवशालिनः।
नीतिं युक्तिं समालम्ब्य लीलयैव प्रकुर्वते।।

**भावार्थः-** ये बुद्धिमन्तः .......... भवन्ति .......... अतिकाठिन्यपूर्णानि अपि .......... नीतिपूर्वकं युक्तिपूर्वकं च .......... सुगमतया कुर्वन्ति।

| **मञ्जूषा-** कार्याणि, ते, विद्वांसः, आश्रित्य |
|---|

**उत्तरम् :**

**भावार्थः-** ये बुद्धिमन्तः **विद्वांसः** भवन्ति **ते** अतिकाठिन्यपूर्णानि अपि **कार्याणि** नीतिपूर्वकं युक्तिपूर्वकं च **आश्रित्य** सुगमतया कुर्वन्ति।

**17. अधोलिखित-कथांशं समुचित-क्रमेण लिखत-** $1/2 \times 8 = 4$

1. अयमेकस्तावद्विभज्य भुज्यताम्।
2. एकैकशो व्याघ्रभक्षणाय कलहं मा कुरूथः।
3. सा धाष्ट्र्यात् पुत्रो चपेटया प्रहृत्य जगाद।
4. इयम् व्याघ्रमारीति मत्वा व्याघ्रो भयाकुलचित्तो पलायितः।
5. मार्गे गहनकानने सा एकं व्याघ्रं ददर्श।
6. राजसिंहस्य भार्या बुद्धिमती आसीत्।
7. गलबद्धश्रृगालकः व्याघ्रः पुनः काननं ययौ।
8. भयाकुलं व्याघ्रं दृष्ट्वा कश्चित् धूर्तः श्रृगालः हसति।

**उत्तरम् :**

1. राजसिंहस्य भार्या बुद्धिमती आसीत्।
2. मार्गे गहनकानने सा एकं व्याघ्रं ददर्श।
3. सा धाष्ट्र्यात् पुत्रौ चपेटया प्रहृत्य जगाद।
4. एकैकशो व्याघ्रभक्षणाय कलहं मा कुरूथः।
5. अयमेकस्तावद्विभज्य भुज्यताम्।
6. इयम् व्याघ्रमारीति मत्वा व्याघ्रो भयाकुलचित्तो पलायितः।
7. भयाकुलं व्याघ्रं दृष्ट्वा कश्चित् धूर्तः श्रृगालः हसति।
8. गलबद्धश्रृगालकः व्याघ्रः पुनः काननं ययौ।

**18. 'क' स्तम्भे लिखितानां पदानां पर्यायपदानि 'ख' स्तम्भे लिखितानि सन्ति। तानि यथासमक्षं लिखत-** $1 \times 3 = 3$ **(केवलं प्रश्नत्रयम्)**

| क | ख |
|---|---|
| प्रतिवचनम् | उपवेष्टुम् |
| वयः | आयुः |
| विचिन्त्य | उत्तरम् |
| अध्यासितुम् | विचार्य |

**उत्तरम् :**

| | | |
|---|---|---|
| प्रतिवचनम् | = | उत्तरम् |
| वयः | = | आयुः |
| विचिन्त्य | = | विचार्य |
| अध्यासितुम् | = | उपवेष्टुम् |

**अथवा**

**अधोलिखितवाक्येषु रेखांकितपदानां प्रसङ्गानुकूलम् उचितार्थं चित्वा लिखत- (केवलं प्रश्नत्रयम्)** $1 \times 3 = 3$

1. सुराधिपः ताम् अपृच्छत्।
(क) इन्द्रः
(ख) सूर्यः
(ग) वृषभः

**उत्तरम् :** (क) इन्द्रः

2. खरः भारस्य वहने अश्वश्च धावने वीरौ स्तः।

(क) वायसः

(ख) गर्दभः

(ग) तुरगाः

**उत्तरम् :** (ख) गर्दभः

3. अनृतम् वदसि चेत् काकः दशेत्।

(क) अनित्यम्

(ख) अलीकम्

(ग) अनुकूलम्

**उत्तरम् :** (ख) अलीकम्

4. व्याघ्रं दृष्ट्वा धूर्तः श्रृगालः अवदत्।

(क) जम्बुकः

(ख) वानरः

(ग) गजः

**उत्तरम् :** (क) जम्बुकः

WWW.CBSE.ONLINE

Download unsolved version of this paper from
www.cbse.online

This sample paper has been released by website www.cbse.online for the benefits of the students. This paper has been prepared by subject expert with the consultation of many other expert and paper is fully based on the exam pattern for 2019-2020. Please note that website www.cbse.online is not affiliated to Central board of Secondary Education, Delhi in any manner. The aim of website is to provide free study material to the students.